श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीदेवराजगुरुभिरनुगृहीतं

# ॥ श्रीशैलेशाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीशैलेशाष्टकम् ॥

सौम्यजामातृयोगीन्द्रचरणाम्बुजषट्पदम्।
देवराजगुरुं वन्दे दिव्यज्ञानप्रदं शुभम्॥

शेषः श्रीमानजनि हि पुरा सौम्यजामातृयोगी
भोगी भूतस्तदनु भगवान् राघवस्यानुजन्मा।
भूत्वा भव्यो वरवरमुनिर्भूयसा भासमानः
रक्षत्वस्मान् रघुकुलपतेरास्थितो भद्रपीठम्॥ १ ॥

श्रोतुं द्राविडवेदभूरिविवृतिं सौम्योपयन्तुर्मुनेः
उत्कण्ठाऽस्ति ममैनमानयत तं तार्क्ष्याश्रयं मण्डपम्।
आविश्यार्चकमूचिवानिति मुदा निश्शेषलोकान्वितः
रङ्गी वत्सरमेकमेवमशृणोत् व्यक्तं यथोक्तक्रमात्॥ २ ॥

श्रीभूम्यां रङ्गनाथे शठजिदुपनिषद्व्याक्रियां श्रोतुकामे
शेषस्सन्तोषयिष्यन् वरवरमुनितां प्राप्य यो वर्ततेऽग्रे।
काषायश्रीतुलस्यम्बुजमणिसुशिखायज्ञसूत्रत्रिदण्डैः
भान्तं शुभ्रोर्ध्वपुण्ड्रं स्मर हृदय सदा कोशमुद्राङ्कहस्तम्॥ ३ ॥

कृपया परया स रङ्गराट्
महिमानं महतां प्रकाशयन्।
लुलुभे स्वयमेव चेतसा
वरयोगिप्रवरस्य शिष्यताम्॥ ४ ॥

समाप्तौ ग्रन्थस्य प्रथितविविधोपायनचये
परं सज्जीभूते वरवरमुनेरङ्घ्रिसविधे।
हठाद्बालः कश्चित् कुत इति निरस्तोऽप्युपगतः
जगौ रङ्गेशाख्यः परिणतचतुर्हायन इदम्॥ ५ ॥

श्रीमान् रङ्गेश्वरो यद्वकुलवरवचोभाष्यसारार्थजातं
श्रुत्वा सौम्योपयन्ता मुनिवरचरणे च्छात्रभावं प्रपन्नः।
श्रीशैलेशेति पद्यं खगपतिनिलये मण्डपे तत्समाप्तौ
उक्त्वाऽध्येतव्यमेतन्निखिलनिजगृहेष्वादिशत्तत्तदादौ॥ ६ ॥

वेदादौ पूर्वमुक्त्वा हरिरिति सुजनो वक्ति पश्चाद्यथोमित्येवं
वक्तव्यमेतद्वकुलधरवचोऽनुश्रवारम्भकाले।
श्रीशैलेशेति पद्यं प्रथममथ सतां संप्रदायैकनिष्ठैः
लक्ष्मीनाथेति पद्यं स्वयमिति भगवानादिशद्रङ्गनाथः॥ ७ ॥

यद्वद्वक्तुं न युक्तं प्रणवहरिपदाभ्यन्तरेऽन्यत्पदं तत्
कृष्णेत्येतत्कदाचिन्मुनिशतवचनैर्वैदिकैर्ब्रह्मनिष्ठैः।
तद्वद्रङ्गेशभक्तैः शमदमनियतैः साधुभिस्तत्त्वविद्भिः
वक्तुं युक्तं न मध्ये सपदि नियतयोरेतयोः पद्यमन्यत्॥ ८ ॥

शठरिपुरेक एव कमलापतिदिव्यकविः
मधुरकविर्यथा च शठजिन्मुनिमुख्यकविः।
यतिकुलपुङ्गवस्य भुवि रङ्गसुधाकविराट्
वरवरयोगिनो वरदराजकविश्च तथा॥ ९ ॥

॥ इति श्रीशैलेशाष्टकम् संपूर्णम्॥